# ॥ श्री गुरु स्मरणम् ॥

नमस्ते नाथ भगवन् शिवाय गुरु रूपिणे ।

विद्यावतार संसिद्ध्यै स्वीकृतानेकविग्रह ।

नवाय नवरूपाय परमार्थस्वरूपिणे ।

सर्वाज्ञानतमोभेद भानवे चित् घनाय ते ।

स्वतन्त्राय दयाक्लुप्त विग्रहाय शिवात्मने ।

परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ।

विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ।

प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ।

पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्यादुपर्यधः ।

सदा मच्चित्तरूपेण विधेहि भवदासनम् ।

त्वत्प्रसादादहंदेव कृतकृत्योऽस्मि सर्वदा ।

मायामृत्युमहापाशात् विमुक्तोऽस्मि शिवोस्म्यहम् ।

प्रातः प्रभृति सायान्तं सायादि प्रातरन्ततः।

यत्करोमि जगन्नाथ तदस्तु तव पूजनम् ।

© Bhaskara Prakasha Ashram